nmo. 8. 18; **v** (Poetics) suggested, implied रतिर्देवादिविषया व्यभिचारी तथाञ्जितः । भावः प्रोक्तः KāvyPra. 118. 1 = RasGaṅ. 57. 1; न हि वाच्यस्य व्यभिचारिणो भावत्वं वक्तुं युक्तम् । 'व्यभिचार्यञ्जितो भावः' इति सिद्धान्तविरोधात् RasGaṅ. 291. 11; **vi** seasoned (with condiments or aromatic substances) एलाभिरञ्जितमिदं पुटितं घनेन । ··· भवति पायसमास्वयास्यम् GopāKeCan. 71. 6. cf. **अक्त.**

**अञ्जिततनु** (añjita-tanu) *adj.* whose body is smeared (with ashes) वन्दे देवमनङ्गम् ···। येन ··· भस्मनाञ्जिततनुर्देवः कपाली बलात् प्रेमक्रुद्धनगात्मजाङ्घ्रिविनतिक्रीडाव्रते दीक्षितः SaduktiKa. 65. 10.

**अञ्जितदृश्** (añjita-dṛś) *adj.* whose eyes are anointed (with some salve) गुटिकास्ति मे । तयाञ्जितदृशं मर्त्यं देवोऽपि हि न पश्यति SamarāSaṁ. 6. 114; *f.* eye smeared with salve औक्षमौक्षमबलाञ्जितदृग्भ्यां कालिमा य उदवास्यत भर्त्रा । सोऽसहिष्णुवनितावदनाब्जे व्यक्ततामभजदाशु निविश्य HammīMaKā. 6. 39.

**अञ्जितनेत्र** (añjita-netra) *adj.* whose eyes are anointed (with salve) (कुञ्जरः) अनेनाञ्जितनेत्रस्तु करोति कदनं रणे AgniP. 286. 31.

**अञ्जितलोचन** (añjita-locana) *adj.* [*f.* -ā] having eyes smeared with (ointment) संभोगजं बीजरजो वराङ्गे तल्लिप्तसंशुष्कसितार्कवर्तिः । तदञ्जनेनाञ्जितलोचनायाः सदैव दासत्वमुपैति कान्तः NāgaSa. 12. 13.

**अञ्जितव्यभिचारिन्** (añjita-vyabhicārin) *m.* (Poetics) transitory emotion which is suggested अञ्जितव्यभिचारी यथा···नो यावत्परिरभ्य चाटुशतकैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः । अत्र विधिं प्रत्यसूया KāvyPra. 120. 1.

**अञ्जिताक्ष** (añjitākṣa) *adj.* having eyes smeared with (ointment) (चूर्णाञ्जनेन) तेनाञ्जिताक्षो नृपतिर्भवेत् सर्वजनप्रियः SuśruS. vi. 18. 93.

**अञ्जिताक्षियुगल** (añjitākṣiyugala) *adj.* having collyrium applied to the pair of eyes पद्मसूत्रकृतां वर्तिं कज्जलार्थं प्रदीपयेत् । तेनाञ्जिताक्षियुगलः···। शर्वर्यां वीक्षते बाढं निधिं भूमितलस्थितम् Mānaso. ii. 3. 349.

**अञ्जितेक्षण** (añjitekṣaṇa) *adj.* having eyes smeared with (ointment) रसेन लाङ्गलीयेन सम्यक्त्वेणाञ्जितेक्षणः । निधनं वा निधानं वा धीरः समधिगच्छति HāsyCū. 143. 10.

**अञ्जित्वा** (añj-itvā) *ger.* having smeared, KātanVṛ. *on* iv. 1. 14; DhātuPra. 7. 21 (120. 15); MugdhaBo. 26. 207 (173. 19); PrakriKau. ii. 683. 11; SiddhāKau. 580A. 17. cf. [2]**अक्त्वा,** [1]**अङ्क्त्वा.**

**अञ्जिमत्** (añji-má(n)t) *adj.* coloured, bright, adorned (मरुतः) पुरुद्रप्सा अञ्जिमन्तः ··· अर्का अमृतं नाम भेजिरे ṚV. v. 57. 5.

**अञ्जिव** (añjivá) *adj.* slippery यः कृणोति मृतवत्सामवतोकामिमां स्त्रियम् । तमोषधे त्वं नाशयास्याः कमलमञ्जिवम् AV. viii. 6. 9.

**अञ्जिषक्थ** (añji-ṣaktha) *adj.* [= अञ्जिसक्थ] (goat) having white spots on the thighs कृष्णग्रीवः शितिकक्षोऽञ्जिषक्थस्ते ऐन्द्राग्नाः MaiS. iii. 13. 5.

**अञ्जिष्ठ** (añj-iṣṭha) *m.* **A** the sun (*lit.* most brilliant) अञ्जिष्ठो भानुः Ujjvaladatta *on* Uṇā. 4. 2; SiddhāKau. 547A. 11; सूर्यः स्यात् ··· अञ्जिष्ठः KośaKaTa. 1. 651; **B** motion अनक्ति अञ्जिष्ठः गतिरञ्जिश्च Prasā. ii. 646. 9; **C** fire, Prasā. ii. 646. 9.

**अञ्जिष्णु** (añj-iṣṇu) *m.* the sun अञ्जिष्ठो भानुः । केचिदञ्जतेरिष्णुच्प्रत्ययमिच्छन्ति । तेषामञ्जिष्णुरित्युदाहरणम् Ujjvaladatta *on* Uṇā. 4. 2.

**अञ्जिसक्थ** (añji-sakthá) *adj.* [cf. P. vi. 2. 199] (goat) having white spots on the thighs अञ्ज्येताय स्वाहाञ्जिसक्थाय स्वाहा शितिपदे स्वाहा TaiS. VII. iii. 17. 1 (*but* Sāy. श्वेतारुणः); कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः VājaS. 24. 4 (Mahīdhara अञ्जि पुण्ड्रं सक्थ्नोरूर्वोर्यस्य); VājaPrāti. 3. 81; KāśiVṛ. *on* P. vi. 2. 199.

**अञ्जिहिष** (añjihiṣa-) [*desid.* of *aṁh-*] to desire to go, DhātuPra. 1. 636 (47. 13); प्राच्यमा (v. l. म) ञ्जिहिषांचक्रे प्रहस्तो रावणाज्ञया । द्वारम् Bhaṭṭi. 14. 15.

**अञ्जिहिषा** (añjihiṣā) *f.* desire for going आंहिष्ट जाताञ्जिहिषस्तदासावुत्कण्ठमानो भरतो गुरूणाम् Bhaṭṭi. 3. 25.

**अञ्जी** (añjī) *f.* **1** benediction अञ्जी मङ्गलार्थः Ujjvaladatta *on* Uṇā. 4. 139; **2** pounding machine [Vācas.]

**अञ्जीकुल** (añjī-kula) *m.* name of a place, CāndraVṛ. *on* iii. 2. 41.

**अञ्जीकेश** (añjī-keśa) *m.* name of a king (originally an Asura-chief called Nicandra) निचन्द्रश्चन्द्रवक्त्रश्च य आसीदसुरोत्तमः । मुञ्जकेश (v. l. अञ्जीकेश) इति ख्यातः श्रीमानासीत् स पार्थिवः MahāBhā. i. 61. 26.

**अञ्जीर** (añjīra) *m.* [Iranian, MAYR. 1. p. 24] species of fig-tree पश्यन्तः ··· अजातकांस्तथा जीरान् (v. l. °स्तथाञ्जीरान्) MahāBhā. iii. 155. 40; *n.* fruit of the Añjīra tree चातुर्जातकमञ्जीरं कङ्कोलं जातिपत्रिका । ··· पचेत् SārṅgaS. ii. 9. 206; अञ्जीरं मञ्ज(?ञ्ज)लं ज्ञेयं काकोदुम्बरिकाफलम् । अञ्जीरं शीतलं स्वादु गुरु पित्तास्रवातजित् । तस्मादन्यगुणं ज्ञेयमञ्जीरं लघु वा गुणैः MadaPāNi. 41. 64; KośaKaTa. 1. 3301.

**अञ्जूप्रकृतिक** (añjūprakṛti-ka) *adj.* having *añjū* (i. e. the root *añj-*) for the base प्रकृतसूत्रस्थभाष्यं त्वञ्जूप्रकृतिककसुपरम् LaŚabdeŚe. ii. 797. 1.

**अञ्जोगति** (añjo-gati) *adj.* having a straightforward motion or flight कर्णस्य शरजालौघैर्भीमसेनस्य चोभयोः । अग्निस्फुलिङ्गसंस्पर्शैरञ्जोगतिभिराहवे । ··· चौरासीत् संवृता MahāBhā. vii. 114. 37; प्रगादमञ्जोगतिभिर्नाराचैरभिताडिताः । निपेतुर्द्विरदा भूमौ MahāBhā. vii. 131. 116 = vii. 136. 6; ततो भास्करवर्णाभमञ्जोगतिमयस्मयम् । ससर्ज तोमरं भीमः प्रत्यमित्राय भानुमान् MahāBhā. viii. 8. 34; viii. 57. 67; viii. 60. 6; viii. 67. 17; रुक्मपुङ्खैः प्रसन्नाग्रैरञ्जोगतिभिराशुगैः Rāmā. 6. 751*(1)

**अञ्जोयान** (añjo-yāna) *adj.* going straight, having a straight course अञ्जोयामा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम् । उप प्रेष्यन्तं पूषणं यो वहात्यञ्जोयानैः (v. l. अञ्जोयानैः) पथिभिस्तत्र गच्छतम् AV. xviii. 2. 53.

**अञ्जोवैरूप** (añjo-vairūpa) *n.* name of a *sāman*, the first of the eight Vairūpa *sāmans* अन्तरिक्षस्य लोकेऽञ्जोवैरूपम् Kṣudra. 91.

**अञ्ज्य** (añjya) *adj.* to be applied as ointment श्वेतं पुनर्नवामूलं जलेनाञ्ज्यं च शूलनुत् RasRaSa. 23. 53.

**अञ्ज्येत** (añjyetá) *adj.* variegated with white spots अञ्ज्येताय स्वाहाञ्जिसक्थाय स्वाहा TaiS. VII. iii. 17. 1 (Sāy. अञ्जिः शुक्रः, एतः सांध्यो वर्णः, अञ्जिश्चासावेतश्चेति अञ्ज्येतः मिश्रवर्ण इत्यर्थः); अञ्ज्येताय स्वाहा कृष्णाय स्वाहा श्वेताय स्वाहेत्यश्वरूपाणि जुहोति TaiBr. III. viii. 17. 4.

**अञ्णित्** (a-ñṇit) (Gr.) (*pratyaya*) other than those marked by the indicatory letters *ñ* and *ṇ* गाङ्कुटादिभ्योऽञ्णित् ङित् P. i. 2. 1; JaineVyā. i. 1. 75; कुटादीनामञ्णिति CāndraVyā. vi. 2. 13; ŚākaṭāVyā. iv. 1. 144; SiddhaHe. iv. 3. 17; PrakriKau. ii. 213. 5; SiddhāKau. 395A. 2.

**अञ्प्रकरण** (añ-prakaraṇa) *n.* topic of the affix *-añ* (P. iv. 1. 86 - P. iv. 2. 44) अञ्प्रकरणे ग्रीष्मादच्छन्दसि Vār. 1 *on* P. iv. 1. 86; अञ्प्रकरणे क्षुद्रकमालवात्सेनासंज्ञायाम् Vār. 1 *on* P. iv. 2. 45.

**अञ्बाधन** (añ-bādhana) *n.* annulment of the operation of the suffix *-añ* युवतिशब्दस्य पाठः···युवतिशब्दस्यानुदात्तादित्वादनुदात्तादेरञ् इत्यञ्बाधनार्थः स्यात् PariVṛ. (Si.) ii. 1. 28 (58. 4)

**अञ्लोप** (añ-lopa) *m.* loss of the suffix *-añ* तेषां प्रत्येकपदस्य बहुषु वृत्त्यभावादञ्लोपो न स्यात् TattvCin. iv(2). 795. 8.

**अञ्शेरा** (añśerā) *adj.* (*f.*) [Alt. Gr. 1, N. 81] rushing straight or forward (as waters) अथ या आपोऽञ्शेरा ओजसा वा एता वीर्येणापोऽञ्शेराः MaiS. iv. 4. 1; cf. **अच्छेर.**

**अट्** (aṭ-) I. P. (Ā.) [cerebralisation of *at-*, MAYR. 1. p. 25; अट पट गतौ DhātuPā. 1. 317; DhātuPra. 1. 293 (28. 15); KāvyKaVṛ. 92. 25 (3. 5); [with pre-verb परि]; attested forms अटति, अटते, अटेत्, अटेत, अट, अटस्व, आटत्, आट, आटीत्, अटीत्, आटिषुः, आटिटत्, अटिटत्, अटिष्ये, अटाट्यते] **i** to wander over, to roam about, to move over, to go (Acc. of the place) कपालपाणिः पृथिवीमटतां चीरसंवृतः Rāmā. ii. 1795* (5); स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः Rāmā. iii. 68. 16; v. 959(1)*; अटध्वं पृथ्वीं कृत्स्नाम् HariVaṁ. 46. 26; अटन्ति वसुधां विप्राः ViṣṇuP. iii. 9. 12; v. 14. 6; कथमल्पेन कालेन पृथिवीमटसि द्विज MārkP. 61. 11; वयम् ··· सततमिमामटवीमटामः HarṣaC. 320. 21; संचेरुः सहसा केचित्स्वनाः केचिदाटिषुः Bhaṭṭi. 7. 57; कपिराटीद् गृहाद् गृहम् Bhaṭṭi. 8. 42; 17. 84; यः संश्रित्य त्रिलोकीमटति SūryaŚ. 60; गूढः प्रदीप्त्या रविराट भूमिम् RāghPāṇḍ. (Dha.) 5. 1; आटामरावतीं सोऽथ साकं पवनवेगया BṛKathāK. 12. 59; 95. 3; अटति यद् भवानङ्घ्रि काननम् BhāgP. x. 31. 15; अटस्व लोकानखिलान् भैक्षार्थी मन्नियोगतः KūrmaP. 670. 9 (2. 31); अटामि जगतीमेतां ब्रह्मघ्नोऽहमिति ब्रुवन् PadmP. iv. 88. 23; (वत्सेश्वरः) आखेटकार्थमटवीमटति स दिने दिने KathāSaSāg. iii. 2. 5; विश्वं तताटाट दिशः DvyāśraKā. 2. 79; 13. 100; MalliC. 1. 85; अटाट्यते प्रतिकुटं स भिस्साभिस्सटाकृते ŚāliC. 6. 87; कुलात्कुलमटतीति कुलटा स्वैरिणी SmṛtiCan. ii. 464. 2; यत्कीर्तिः कौतुकेन त्रिभुवनमटति स्पष्टपुण्यः स एषः श्रीहेमाद्रिः CaturCin. iii(1). 630. 5; सिद्धसेनश्चित्रकूटमटति स PrabaK. 17. 6; अटत गेहमगात् समयो बहुः SaṅkaDigVi. (Mā.) 16. 21; विश्रान्तो दिवसस्तटीमयमटत्यस्ताचलस्यांशुमान् ŚārṅgaPa. 3420; अतिविदग्धतया भ्रमिमाचरन्न कुलटाजन आट दृशोः पदम् HammīMaKā. 7. 18; 13. 225; तीर्थान्यटानीतीच्छा ŚivārkaMaDī. ii. 70. 32 (*on* ii. 2. 11);